श्री राधामदन मोहन जयति

श्रीरणधामदनमोहनदेवोजयतां ॥ श्रीमज्जुरवेनम : ॥ पांडवउ
वाच ॐकारंविंदुसंयुक्तंनित्यंध्यायंतियोगिन : ॥ कामदंमो
क्षदंचैवओंकारायनमोनम : ॥ १ ॥ प्रह्लादनारदपराशरपुंड
रीकव्यासंवरीषशुकशौनकभीष्मकाद्या : ॥ रुक्मांगदार्जुनव
सिष्ठविभीषणाद्या : एतानहंपरमभगवतान्नमामि ॥ लोम
हर्षणउवाच ॥ धर्मोविवर्द्धतियुधिष्ठिरकीर्त्तनेनपापंप्रणा
श्यतिवृकोदरकीर्त्तनेनशत्रुर्विनश्यतिधनंजयकीर्त्तने

१

नमाद्रीसुतोकथयतांनभवंतिरोगा : ॥ ३ ॥ ब्रह्मोवाच नारा
यणोनामनरोनराणांप्रसिद्धचोर : कथित : पृथिव्यां ॥ अनेकज
न्मार्जितपापसंचयंहरत्यशेषंस्मृतमात्रएव ॥ ४ ॥ अहोभा
ग्यमहोभाग्यंनंदगोपव्रजौकसां ॥ यन्मित्रंपरमानंदंपूर्णब्रह्म
सनातनं ॥ ५ ॥ इंद्रोउवाच ॥ येमानवाविगतरागपरावरज्ञा
नायणंसुरगुरुंसततंस्मरंति ॥ ध्यानेनतेनहतकिल्बिषचेतर
नास्तिमातु : पयोधरस्तनपुन : पिबंति ॥ ६ ॥ युधिष्ठिरउवाच

Digitized with financial assistance from the Government of Maharashtra on 11 June, 2017

मेघश्यामंपीतकौशेयवासंश्रीवत्सांकंकौस्तुभोज्ज्वलितांगं पुराणंपु
२ रुषंतंपुंडरीकायताक्षंविष्णुंवंदेसर्वलोकैकनाथं ॥७॥ भीमसेनउवा
च ॥ जलौघमग्नासचराचराधराविषाणकोट्याखिलविश्वमू
र्त्तिनासमुद्धृतायेनवराहरूपिणासमेस्वयंभूर्भगवान्प्रसीद
तु ॥८॥ अर्जुनउवाच ॥ अचिंत्यमव्यक्तमनंतमव्ययंविभुंप्र
भुंभावितभूतभावनं ॥ त्रैलोक्यविस्तारविचारकारकंहरिंप्र
पन्नोस्मिगतिंमहात्मनां ॥९॥ नकुलउवाच ॥ यद्गिरमनमध

स्तात्कालपाशानुबंधाद्धिचकुलविहीनेजायतेपक्षिकीटे कृ
मिशतमपिगोलाजायतेचांतरात्मामममभवतुहृदिस्थाकेशवेभ
क्तिरेका ॥१०॥ सहदेवउवाच ॥ तस्ययज्ञवराहस्यविष्णोरमित
तेजसः ॥ प्रणामंयेपिकुर्वंतितेषामपिनमोनमः ॥११॥ कुंतु
वाच ॥ स्वकर्मफलनिर्दिष्टांयांयोनिंव्रजाम्यहं ॥ तस्यांत
स्यांहृषीकेशत्वयिभक्तिर्दृढास्तुमे ॥१२॥ माद्रीउवाच ॥ कृष्णकृ
ताःकृष्णमनुस्मरंतिरात्रौचकृष्णंपुनरुत्थितायेतेभिन्न

देहाःप्रविशंतिकृष्णंहवियेथामंत्रकृतंकृताशे १३ द्रौपद्युवा
च कीटेषुपक्षिषुमृगेषुसरीसृपेषुरक्षःपिशाचमनुजेष्वपिर
यत्रयत्र जातस्यमेभवतुकेशवत्वत्प्रसादान्नयैवभक्तिर
चलाव्यभिचारिणीच १४ सुभद्रोवाच एकोपिकृष्णस्य
कृतःप्रणामोदशाश्वमेधावभृथेनतुल्यः दशाश्वमेधीपु
नरेतिजन्मकृष्णप्रणामीनपुनर्भवाय १५ अभिमन्युरु
वाच गोविंदगोविंदहरेमुरारेगोविंदगोविंदमुकुंदकृष्ण

गोविंदगोविंदरथांगपाणेगोविंदगोविंदनमोत्यजेथाः॥१६॥
धृष्टद्युम्नोवाच॥श्रीरामनारायणवासुदेवगोविंदवैकुंठमुकुं
दकृष्ण॥श्रीकेशवानंतनृसिंहविष्णोमांत्राहिसंसारभुजंग
दष्टं १७॥सात्यकिरुवाच॥अप्रमेयहरेविष्णोकृष्णदामोद
रच्युत॥गोविंदानंतसर्वेशवासुदेवनमोस्तुते॥१८॥भोजनेश
यनेचिंतास्थाकुर्वंतिवैस्त्रियः॥योसौविश्वंभरोदेवोकथं
मत्कानुपेक्षते १९ उद्धवउवाच वासुदेवंपरित्यज्ययोन्यदे

वमुपासते तपिनोजाह्नवीतीरेकूपंखनतिदुर्मतिः॥ २०॥ धौ
म उवाच॥ अपांसमीपेशयनासनेगृहेदिवाचरात्रौचयथा
नुगच्छतां॥ यद्यस्तिकिंचित्सुकृतंकृतंमयाजनार्दनस्तेन
कृतेनतुष्यतु॥ २१॥ कायेनवाचामनसेंद्रियैर्वाबुद्ध्यात्मना
वाप्रकृतिस्वभावः॥ करोमियद्यत्सकलंपरस्मैनारायणा
यतिसमर्पयामि॥ २२॥ संजय उवाच॥ आर्त्तीविषण्णाशिथि
लाश्चभीताघोरेषुचव्याधिषुवर्त्तमानाः॥ संकीर्त्यनारायणा

शब्दमात्रेविमुक्तदुःखाःसुखिनोभवंति॥ २३॥ अक्रूर उवाच
अहमस्मिनारायणदासदासःदासस्यदासस्यचदासदासः॥ अ
न्येभयंईशोजगतोनराणांतस्मादहंप्रेष्यतरोस्मिलोके॥ २४॥ विदु
र उवाच वासुदेवस्ययेभक्ताःशांतास्तकृतमानसाः॥ तेषांदा
सस्यदासोहंभवेज्जन्मनिजन्मनि॥ २५॥ भीष्म उवाच विपरी
तेषुकालेषुपरित्रीणेबंधुषु॥ त्राहिमांकृपयाकृष्णशरणागत
वत्सल॥ २६॥ द्रोण उवाच येयेहताश्चक्रधरेणराजन्त्रैलो

कृष्णनाथेनजनार्दनेन ॥ तेतेगताविष्णुपुरीनरेंद्राः क्रोधोपि
देवस्यवरेणतुल्यः ॥ २७ कृपाचार्य्यउवाच ॥ मज्जन्मनः फ
लमिदंमधुकैटभारेमत्प्रार्थनीयमदनुग्रहएषएव ॥ भृ
त्यस्यभृत्यपरिचारकभृत्यभृत्यस्यभृत्यइतिमांस्मरलो
कनाथ ॥ २८ अश्वत्थामोवाच ॥ गोविंदकेशवजनार्दनवा
सुदेवविष्वेशविश्वसूदनविश्वरूप ॥ श्रीपद्मनाभपुरुषोत्त
मपुष्कराक्षनारायणाच्युतनृसिंहनमोनमस्ते ॥ २९ भीतु

DR BHAU DAJI

रुवाच ॥ अहोनृसिंहकरुणाकरणमकृष्णगोपालमाधवप
रेशमुकुंदविष्णो गोविंदकेशवजनार्दननाथश्रीमन्हरे
महीनिधेहृदयाविलोक ॥ ३० कर्णउवाच ॥ देहीतिवचनंकष्टं
नास्तीतिवचनंतथा ॥ देहिनास्तीतियद्वाक्यंमाभूज्जन्मनिजन्म
नि ॥ ३१ ॥ नाम्नंवदामिनमरोमिनचिंतयामिनाम्नंस्मरामि
नभजामिनचाश्रयामि ॥ भक्त्यातवदीयचरणांबुजमादरेण
श्रीश्रीनिवासपुरुषोत्तमदेहिदास्यं ॥ ३२ विप्रस्यपोष्यधनं

यो गी क्षीणंसदावागतयौवनं स्वामिकार्य्येगतांप्राणत्यजेतेति
६ ष्ठंतिमाधवो ३३ गजेंद्रउवाच। तावद्भवतुमेदुःखंचिंता
संसारसागरे। यावत्कमलपत्राक्षंनस्मरामिजनार्दनं ३४
धृतराष्ट्रउवाच नमोनमःकारणवामनायनारायण
यामितविक्रमायश्रीशार्ङ्गचक्रासिगदाधरायनमोस्तुत
स्मैपुरुषोत्तमाय ३५ गांधार्य्युवाच। त्वमेवमातापिता
त्वमेवत्वमेवंधुश्चसखात्वमेव। त्वमेवसेवश्चगुरुस्त्वमे ६।

त्वमेवा १ वासु
वँसर्वंममंदेव॥३६॥श्रज्ञानतिमिरांधस्यक्षेत्रेमानेनकेश
व।प्रसीदसन्मुखोनाथज्ञानदृष्टेप्रदोभव॥३७॥द्रुपदउवा
च॥यज्ञेशाच्युतगोविंदमाधवानंतकेशव॥कृष्णविष्णो
हृषीकेशवासुदेवनमोस्तुते॥३८॥युधिष्ठिरउवाच॥जाना
मिधर्म्मनचमेप्रवृत्तिर्जानामिपापंनचमेनिवृत्तिः॥केना
पिदेवेनहृदिस्थितेनयथानियुक्तोस्मितथाकरोमि ३९ जयद्र
थउवाच नमःकृष्णायशुद्धायब्रह्मरोनंतमूर्त्तये योगेश्व

पां गी रययोगायलाभदंशरणंगत ॥४२॥ विकर्णउवाच ॥ कृष्णायवा
॥७॥ सुदेवायदेवकीनंदनायच ॥ नंदगोपकुमारायगोविंदायन
मोनमः ॥ ४१ ॥ सोमदत्तउवाच नमः परमकल्याणनमस्तेविश्व
भावन ॥ वासुदेवशांतायय दूनांपतयेनमः ॥ ४२ ॥ विराटउ
वाच ॥ नमोब्रह्मण्यदेवायगोब्राह्मणहितायच जगद्धिताय
कृष्णायगोविंदायनमोनमः ॥ ४३ ॥ शल्यउवाच कृष्णत्वदी
यपदपंकजपंजरांतेअद्यैवमेविशतुमानसराजहंसः ॥ प्रा॥

॥७॥

प्रयाणसमयेकफवातपित्तैः कंठावरोधनविधौस्मरणंकु
तस्ति ॥ ४४ ॥ अतसीपुष्पसंकाशंपीतवाससमच्युतं ॥ येनम
संतिगोविंदंनतेषांविद्यतेभयं ॥ ४५ ॥ वल्लभइउवाच कृष्ण
कृष्णकृपालुस्त्वमगतीनांगतिर्भवा ॥ संसारार्णवमग्नानांप्र
सीदपुरुषोत्तम ॥ ४६ ॥ कृष्णकृष्णमधुमर्दनविश्वोकेशभी
तकमुकुंदमुरारे ॥ वासुदेवघनसुंदरदेवलंसदेवकलु
षांतकरक्ष ॥ ४७ ॥ श्रीकृष्णउवाच ॥ सत्यंवदामिमनुजाः

स्वयमूर्द्धवाहुर्योमांमुकुंदनरसिंहजनार्दनेति क्रीवोजपेत्
त्यनुदिनंमरणेरणेवापाषाणकाष्टसदृशायददाम्यभीष्टं ७
हेकृष्णकृष्णेतिकृष्णेतियोमांस्मरतिनित्यशः॥ जलंभि
त्वायथापद्मंनरकादुद्धराम्यहं ४८॥ ईश्वरउवाच सकृन्ना
रायणेत्युक्त्वापुमान्कल्पशतत्रयं। गंगादिसर्वतीर्थेषु
स्नातोभवतिपुत्रक ४९॥ पार्वत्युवाच तत्रैवगंगायमु
नाचतत्रगोदावरीसिंधुसरस्वतीच॥ सर्वाणितीर्थानि

८

वसंतितत्रयत्राच्युतोदारकथाप्रसंगः॥ ५१ शालग्रामशि
लायत्रयत्रद्वारावतीशिला॥ उभयोःसंगमोयत्रमुक्तिस्तत्र
नसंशयः ५२॥ ज्ञानकृद्ध्यानजलेरागद्वेषमलापहे यस्ना
तिमान्नसेत्तीर्थेसयातिपरमांगतिं॥ ५३॥ एकादशीमुपवसंति सं
निरंबुभक्ष्यासंवत्सरंतुकुसुमैर्हरिमर्चयंति॥ तेधौतपांडुर
पटाइवराजहंसाःसंसारसागरजलंस्यतरंतिपारं ५४॥ यम
उवाच॥ नरकेपच्यमानस्यमेनपरिभाषितं किंत्वयाना

पांगी र्चितोदेवः केशवः क्लेशनाशनः ॥ नारदउवाच॥ जन्मांत
रसहस्रेणतपोध्यानसमाधिभिः ॥ नारायणेक्षीणपापानांकृ
स्नेभक्तिःप्रजायते॥ ५६ वासुदेवदयाशीललीलयाभांस
मुद्धरन्धरोद्धारेसमर्थोसिममोद्धारेकिमाश्रमः ॥ ५७ ॥
ब्रह्मोवाच॥ नाथयोनिसहस्रेषुयेषुयेषुव्रजाम्यहं॥तेषु
तेष्वच्युतेभक्तिरचलास्तुसदाममा ॥ ५८ यांप्रीतिरविवेका
नांविषयेष्वनपायिनी॥ त्वामनुस्मरणात्सामेहृदयान्मप ॥ ६

सर्पतु॥ ५९॥ दालभ्यउवाच॥ वासुदेवेमनोयस्यजपहोमार्चना
दिषु॥ तस्यांतरायोमैत्रेयदेवेंद्रत्वादिकंफलं॥६०॥नदेशनिय
मस्तस्यनकालनियमस्तथा॥ नोच्छिष्टादोनिषेधश्चहरेर्नामिच
लधिकः॥ ६१॥मैत्रेयउवाच॥जीवनंविष्णुभक्तस्यवरंपंचदि
नानिच॥ नतुकल्पसहस्राणिभक्तिहीनस्यकेशवे॥६२॥
विश्वामित्रउवाच॥ किंतस्यदानैःकिंतीर्थैःकिंतपोभिःकि
मध्वरैः योनित्वंध्यायतेदेवंनारायणमनन्यधीः॥ ६३॥



योगी जमदग्निरुवाच सर्वदासर्वकार्येषुनास्तितेषाममंगलं
१० नित्योत्सवोभवेत्तेषांनित्यःश्रीर्नित्यमंगलं ६४ नित्योत्स
वोभवत्तेषांनित्यंश्रीर्नित्यमंगलं ॥ यद्धृदिस्थितोभगवा
न्मंगलायतनोहरिः ६५ श्रीबादरायणउवाच ॥ अच्युत
कल्पवृक्षोसौश्रीमंतः कामधेनवः ॥ चिंतामणिश्चगोवि
दोहरिर्नामविचिंतयेत् ६६ हरिरुवाच ॥ जयतुजयतु
देवोदेवकीनंदनोयंजयतुजयतुकृष्णोवृष्णिवंशप्रदीपः

जयतुजयतुमेघश्यामलःकोमलांगोजयतुजयतुपृथ्वीभार
नाशनोमुकुंदः ॥ ६७ भारद्वाजउवाच ॥ लाभस्तेषांजयस्तेषांकु
तस्तेषांपराजयः ॥ येषामिंदीवरश्यामोहृदयस्थोजनार्दनः
६८ आपदामपिहर्त्तारंदातारंसर्वसंपदां ॥ लोकाभिरामं
श्रीरामंभूयोभूयोनमाम्यहं ॥ ६९ शल्यउवाच ॥ त्रैलोक्यचै
तन्यमयादिदेवश्रीनाथविष्णोभगवन्परेश ॥ प्रातःसमुत्था
यतवप्रियार्थंसंसारयात्रामनुवर्त्तयामि ७० भुवनानि

षु

विष्णुर्भवनानिविष्णुर्गहनानिविष्णुःसलिलानिविष्णुः। स्त्रीपु
रुषेविष्णुर्यश्चास्तिनास्तीतितदेवविष्णुः ७० किंतात
वेदागमशास्त्रचिंतयातीर्थैःसमस्तैरपिकिंप्रयोजनं यद्यात्म
नोवांछसिमुक्तिसंपदांगोविंदगोविंदइतिस्फुटंरट ७१ प्रति
ज्ञातवंगोविंदमुक्तानांप्रसीदतिइतिसंस्मृत्यसंस्मृत्यप्रा
णान्संधारणाम्यहं ७२ गौतमउवाच गोकोटिदानंग्रह
णेषुकाशीमकरेप्रयागेयदिकल्पवासी। यज्ञायुतंमेरुसुव

र्णदानंगोविंदगोविंदस्मरणेनतुल्यं ७३ अविरुवाच
गोविंदेतिसदास्नानंगोविंदेतिसदाजपंगोविंदेसदाध्यानं
सदागोविंदकीर्त्तनं ७४ त्र्याक्षरंपरंब्रह्मगोविंदेतित्र्या
क्षरं तस्मादुच्चरितंयेनब्रह्मभूयायकल्पते ७५ वशिष्ठउ
ति वाच हस्तेमंगलंनामयस्यवाचिप्रवर्त्तते। भस्मीभवंति
तस्याशुमहापातककोटयः ७६ अरुंधत्युवाच। कस्मा
द्यवासुदेवाहरयेपरमात्मने। प्रणतक्लेशनाशायगोवि

दायनमोनमः ७७ कश्यपउवाच नामैकमेवक्राहिजिह्वा
१२ क्तिवेत्सवी॥ प्राप्नोमहरिसंकीर्त्तिजगत्कृत्स्नंपुनातिहि ७
८ कृत्स्नानुस्मरणादेवपापसंघातपंजरं शतधाभेदमाप्नो
तिगिरिर्वज्रहतोयथा ७९॥ मार्कंडेयउवाच हरेमहरेम
रामरामहरेहरे एतदेवसदावूयाद्धारणामेमधुसूदन ८०
भृगुरुवाच नामैवतवगोविंद नामैवलक्षशताधिकं
दादात्युच्चारणन्मुक्तिंभवानष्टांगयोगतः ८१ लोमहर्ष

१२

उवाच नमामिनारायणपादपंकजंकरोमिनारायणपूज
नंसदा वदामिनारायणनाममिर्मलंस्मरामिनारायेर
णतत्वमव्ययं ८३॥ गंगोवाच नारायणेतिमंत्रोस्तिवाग
स्तिवसवर्त्तिनी तथापिनरकेघोरेपतंतीत्यद्भुतंमहत ८३
धन्वंतरउवाच किंतस्यावदुभिर्मंत्रैर्भक्तिर्यस्यजनार्दने
नमोनारायणायेतिमंत्रः सर्वार्थसाधकः ८४ नश्चुतं
नंतगोविंदनामोच्चारणभेषजं नश्यंतिसकलारोगाः
सत्यंसत्यंवदाम्यहं ८५॥ श्रीवेदव्यासउवाच सत्यंसत्यं

पुनःसत्यमुद्धृत्यभुजमुच्यते वेदाच्छास्त्रंपरंनास्तिनदेवः
१३ केशवात्परं ८६ ऋंगिरउवाच हरिर्हरतिपापानिदुष्टचि
त्तैरपिस्मृतः ऋनिच्छयापिसंस्पृष्टोदहत्येवहिपावकः ८
७ पराशरउवाच सकृदुच्चरितंयेनहरिरित्यक्षरद्वयंवक्त्रः
परिकरस्तंनमोक्ष्यायगमनंप्रति ८८ पुलस्त्यउवाच हे
जिह्वेरससारज्ञेसर्वदामधुरंप्रिये नारायणाख्यपीयूषं
पिवजिह्वेनिरंतरं ८९ हेजिह्वेकटुस्नेहमधुरंकिंनभा
षसे मधुरंवदसिकल्याणमधुरंहिलोकप्रियं श्रीमहा

देवउवाच सारात्सारतरंहरेर्द्विजसचांधजडमूकता यन्मु
कुंदेचरणांबुजेवसुदृढंनचिंतयेत् ८० निमिषंनिमिषा
र्द्धवाप्राणिनांविस्मृचिंतनं तत्रतत्रकुरुक्षेत्रःप्रयागंनै
मिषंवनं ८१ सनत्कुमारउवाच यस्यहस्तेगदाचक्रं
गरुडोयस्यवाहनं शंखंचक्रंगदापद्मंसमेविष्णुप्रसीदतु
८२ श्रीशेषउवाच नभूमेःपर्वतानांचनास्तिभारोवन
स्पतेःविष्णुभक्तिविहीनस्यतस्यभारोसदाममं ८३
चित्तेमुकुंदोवदनेमुकुंदःश्रवणेमुकुंदोनेत्रेमुकुंदः

येषांसदासर्वगतोमुकुंदस्तेमानवाःकिंनमुकुंदतुल्याः
॥ श्रीशुकउवाच ॥ आलोड्यसर्वशास्त्राणिविचार्य
चपुनःपुनः इदमेकसुनिष्पन्नंध्येयोनारायणःस
दा ॥ उच्छिष्टतांस्वहस्तेनजिह्वाग्रस्वरूपणी या
नारायेतिकृष्णेतिगोविंदेतिनजल्पति ॥ हरेर्नामै
वनामैवनामैवममजीवनं कलौनास्त्येवनास्त्ये
वनास्त्येवगतिरन्यथा ॥ मंगलंभगवान्विष्णुः
मंगलंगरुडध्वजः मंगलंपुंडरीकाक्षः मंगलायतनो

हरिः ॥ संजयउवाच एवंव्यासादयोदेवाऋषयश्चतपो
धनाः कीर्त्तयंतिसुरश्रेष्ठंदेवंनारायणंप्रभुं ॥ इदं
पवित्रमाख्यातंपुराणंपापप्रणाशनं दुःस्वप्ननाशनंस्तो
त्रंपांडवैःपरिकीर्त्तितं ॥ १०० ॥ यःपठेत्प्रातरुत्थायवै
ष्णवंस्तोत्रमुत्तमं ॥ सगच्छेत्परमंस्थानंयत्रयोगीश्व
रोहरिः ॥ १०१ ॥ इतिश्रीमहाभारतेपांडवगीतासप्त
श्रीकृष्णायनमः श्रीहरयेनमः ॥ ❀ ५ ० ७

Digitized with financial assistance from the Government of Maharashtra on 11 June, 2017

DR BHAU DAJI
डाक्टर भाऊ दाजी इस्पात्व्यस्मारकम्
MEMORIAL